"पिण्डं दद्यात् गयाशिरे ।"इति वायुपुराणम् ॥ "शिरो वाटी शिरोऽदन्तो रजोवाटी रजस्वथा ।" इति कोषान्तरम् ॥) शय्या । अजगरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

शिरः, [स्] क्ली, ( श्रि + "अयतेः स्वाङ्गे शिरः किच्च ।"उणा० ४।१९३ । असुन् । स च कित् । धातोः शिरादेशश्च । ) शिखरम् । ( यथा, महाभारते । ४ । २३ । २ । "यथा वज्रेण वै दीर्णं पर्व्वतस्य महच्छिरः ॥") मस्तकम् । इत्यमरः ॥ ( यथा, लक्ष्मीचरित्रे । "शिरः सपुष्पं चरणौ सुपूजितौ ॥") तच्च मासमात्रेण भवति । इति सुखबोधः ॥ तद्रोगनाशकौषधम् । यथा,— "शिरोरोगहरं लेपात् गुञ्जामूलं सकाञ्जिकम् ।" इति गारुड़े १९८ अध्यायः ॥ प्रधानम् । ( यथा, भागवते । ५ । १४ । ४५ । "योगाय सांख्यशिरसे प्रकृतीश्वराय ॥") सेनाग्रम् । इति मेदिनी ॥

शिरःकपाली, [न्] पुं, (शिरःकपालोऽस्यास्तीति इनिः ।) नरमस्तककपालधारी सन्न्यासी । इति केचित् ॥

शिरःफलः, पुं, (शिरस्तुल्यं फलं यस्य ।) नारिकेलः । इति त्रिकाण्डशेषः ॥

शिरःशूलं, क्ली, ( शिरसः शूलम् । ) मस्तकवेदनारोगः । ( यथा, कथासरित्सागरे । १३ । १५५ । "प्रातः सोऽपि शिरःशूलव्यपदेशेन वेष्टनम् । कृत्वा प्रच्छादयामास ललाटतटमङ्कितम् ॥") तस्यौषधं यथा,— "श्वेतापराजितामूलं पिप्पलीशशिठसंयुतम् । परिपिष्टं शिरोलेपात् शिरःशूलविनाशनम् ॥" इति गारुड़े १९८ अध्यायः ॥

शिरजः, पुं, ( शिरसो जायते इति । जन + डः ।) केशः । इति शब्दरत्नावली ॥

शिरसिजः, पुं, ( शिरसि जायते इति । जन + डः । ) केशः । इति जटाधरः ॥ ( यथा, माघे । ७ । ६२ ।
"अथशिरसिजपाशपातभारा-
दिव नितरां नतिमद्भिरंसभागैः ॥")

शिरसिरुहः, पुं, ( शिरसि रोहतीति । रुह + कः ।) केशः । इति शब्दरत्नावली ॥

शिरस्कं, क्ली, शिरस्त्राणम् । इति हेमचन्द्रः ॥ शिरःसम्बन्धिनि, त्रि ॥

शिरस्त्रं, क्ली, ( शिरस्त्रायते इति । त्रै + कः ।) शिरोरक्षणसन्नाहः । टोप इति ख्यातः । इत्यमरभरतौ ॥ ( यथा राजतरङ्गिण्याम् ।५।४७। "वल्गन् मध्येऽश्ववाराणां नृत्यत्येवाश्ववाजिना वल्गाङ्गेनोद्दहस्त्वं शिरस्त्रं वामपाणिना ॥")

शिरस्त्राणं, क्ली, ( शिरस्त्रायते अनेन । त्रै + ल्युट् ।) शिरोरक्षणसन्नाहः । खोपड़ा इति टोप् इति च भाषा । तत्पर्य्यायः । शीर्षण्यम् २ शीर्षकम् ३ शिरस्कम् ४ । इति हेमचन्द्रः ॥ शिरस्त्रम् ५ । इत्यमरः ॥ ( यथा, रघौ । ४ । ६४ । "अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ॥")

शिरस्यः, पुं, ( शिरस् + "शाखादिभ्यो यत् ।" ५ । ३ । १०३ । इति यत् । ) विशदकचः । तत्पर्य्यायः । शीर्षण्यः २ । इत्यमरः ॥ द्वे स्वतः स्नानादिना वा निर्म्मले अन्योन्यासंपृक्ते केशे । इति भरतः ॥

शिरा, स्त्री, धमनिः । इति मेदिनी ॥ शिर इति भाषा । अस्याः पर्य्यायादिकं नाड़ीशब्दे द्रष्टव्यम् ॥

शिरापत्रः, पुं, (शिरायुक्तं पत्रं यस्य ।) हिन्तालवृक्षः । इति राजनिर्घण्टः ॥ कपित्थः । इति शब्दचन्द्रिका ॥

शिरालं, क्ली, ( शिराः सन्ति अस्य । "प्राणिस्थादातो लजन्यतरस्याम् ।" ५ । २ । ९६ । इति लच् । ) कर्म्मरङ्गम् । इति शब्दचन्द्रिका ॥ ( शिरायुक्ते, त्रि । यथा, भट्टौ । २ । ३० ।
"आपिङ्गरूक्षोर्द्ध्वशिरस्यबालैः
शिरालजङ्घैर्गिरिकूटदघ्नैः ॥")

शिरालकः, पुं, (शिराल इव । कन् ।) अस्थिभङ्गवृक्षः । इति शब्दचन्द्रिका ॥ हाड़भाङ्गा इति भाषा ॥

शिरावृत्तं, क्ली, सीसकम् । इति राजनिर्घण्टः ॥

शिरिः, पुं, (शृणात्यनेन + "कॄगॄशॄपॄकुटिभिदिछिदिभ्यश्च ।" उणा० ४ । १४२ । इति इः । स च कित् । ) खड्गः । शरः । हिंस्रः । इत्युणादिकोषः ॥ शलभः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शिरीषः, पुं, (शृणाति झटिति म्लायतीति । शॄ + "शॄपॄभ्यां किच्च ।" उणा० ४ । २७ । इति ईषन् स च कित् । ) स्वनामख्यातवृक्षः ।(यथा, कुमारे । ५ । ४ ।
"पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः ॥")
तत्पर्य्यायः । कपीतनः २ भण्डिलः ३ । इत्यमरः ॥ भण्डिरः ४ भण्डीरः ५ भण्डीलः ६ । इति तट्टीका ॥ मृदुपुष्पः ७ शुकतरुः ८ विषनाशनः ९ । इति रत्नमाला ॥ शीतपुष्पः १० भण्डिकः ११ स्वर्णपुष्पकः १२ शुकेष्टः १३ वर्हपुष्पः १४ विषहन्ता १५ सुपुष्पकः १६ उद्दानकः १७ शुक्रतरुः १८ लोमशपुष्पकः १९ कपीतकः २० कलिङ्गः २१ श्यामलः २२ शङ्खिनीफलः २३ मधुपुष्पः २४ हृत्पुष्पः २५ । पुस्तकान्तरे शिखिनीफलः२६ भण्डी२७ प्लवगः २८ शुकपुष्पः २९ । अस्य गुणाः । कटुत्वम् । शीतलत्वम् । विषवातपामाकुष्ठकण्डूतित्वग्दोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । "शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः ॥ शिरीषो मधुरोऽनुष्णस्तिक्तश्च तुवरो लघुः । दोषशोथविसर्पघ्नः कासव्रणविषापहः ॥" इति भावप्रकाशः ॥ * ॥ कण्टकशिरीषस्य पर्य्यायः । "कटभी किणिही श्वेता महाश्वेता च रोहिणी ।" इति रत्नमाला ॥ * ॥ अस्य गुणाः । "शिरीषो विषवीसर्पस्वेदत्वग्दोषशोथजित् ।" इति राजवल्लभः ॥

शिरीषपत्रिका, स्त्री, (शिरीषस्य पत्रमिव पत्रमस्याः । ततः स्वार्थे कन् । टापि अत इत्वम् ।) श्वेतकिणिही । इति राजनिर्घण्टः ॥

शिरोगृहं, क्ली, (शिरसो गृहम् ।) अट्टालिकोपरिगृहम् । तत्पर्य्यायः । चन्द्रशाला २ । इति हेमचन्द्रः ॥

शिरोग्रीवं, क्ली, शिरश्च ग्रीवा च द्वयोः समाहारः । यथा । द्वन्द्वैकत्वं अव्ययीभावश्च क्लीवे स्यात् द्वन्द्वस्य समासस्य एकत्वं समाहारद्वन्द्व इत्यर्थः । यथा, वाक्त्वचं श्रीस्रजं पाणिपदं शिरोग्रीवम् । इति क्लीवलिङ्गसंग्रहटीकायां भरतः ॥

शिरोधरा, स्त्री, (शिरसो धरा ।) ग्रीवा । इति हेमचन्द्रः ॥ ( यथा भागवते । ३ । १७ । १० ।
"सङ्गीतवद्रोदनवदुन्नमय्य शिरोधराम् ।
व्यमुञ्चन् विविधा वाचो ग्रामसिंहास्ततस्ततः ॥"
क्लीवलिङ्गेऽपि दृश्यते । यथा, तत्रैव । ३ । १३ । ३७ ।
"दीव्यानुजव्योपसदः शिरोधरम् ॥")

शिरोधिः, स्त्री, ( शिरो धीयते अनया । धा + "कर्म्मण्यधिकरणे च ।"३।३।९३। इति किः ।) ग्रीवा । इत्यमरः ॥

शिरोमणिः, पुं स्त्री, ( शिरसो मणिः ।) मस्तकधार्य्यरत्नम् । तत्पर्य्यायः । चूड़ामणिः २ शिरोरत्नम् ३ । इति शब्दरत्नावली ॥ पण्डितस्य उपाधिविशेषश्च ॥ (द्वयोरुदाहरणम् । यथा,— "यस्य सांसारिकी चिन्ता चिन्ता चिन्तामणेः कुतः । तथैव हि शिरःकम्पः क्व शिरोमणिधारणम् ॥" इत्युद्भटः ॥ )

शिरोमर्म्मा, [न्] पुं, (शिर एव मर्म्म जीवाधानं यस्य । ) शूकरः । इति हेमचन्द्रः ॥

शिरोरत्नं, क्ली, (शिरसो रत्नम् ।) शिरोमणिः । इत्यमरः ॥

शिरोरुजा, स्त्री, ( शिरसि रुजतीति । रुज + कः । टाप् । ) सप्तपर्णवृक्षः । इति त्रिकाण्डशेषः ॥ मस्तकरोगश्च ॥

शिरोरुट्, [ह्] पुं, (शिरसि रोहतीति । रुह + क्विप् । ) केशः । इति शब्दरत्नावली ॥

शिरोरुहः, पुं, (शिरसि रोहतीति । रुह + कः ।) केशः । इत्यमरः ॥ ( यथा, भागवते । ४ । २८ । ४४ । "चीरवासा व्रतक्षामा वेणीभूतशिरोरुहा ॥")